इस प्रकार यहाँ ध्यान का लक्षण बताया गया है। अब अंगभाव के विषय में कहा जा रहा है। हे महासेन ! यह अंगभाव चार प्रकार का होता है। अंग, प्रत्यंग, सांग और उपांग — ये चार उसके भेद हैं। शिर, मुख और हृदय की गणना अंग में की जाती है।।९१-९२।।

वक्षस्थल, कण्ठ, स्तनद्वय, बाहुद्वय, नाभि, गुह्य, उदर, नेत्रद्वय, नासापुट, मुख, कर्णद्वय, पाणिद्वय, पादद्वय, अंगुलियाँ, दोनों जाँघे, दोनों घुटने, दोनों पिण्डलियाँ — ये सब प्रत्यंग कहलाते हैं। मूर्तियों के गुणों और रूपों को सांग कहा जाता है। गुण का अर्थ चिह्न है। इन गुणों की संख्या दस मानी गई है। त्रिगुण, शक्ति, खड्ग, दुर्भेद्य, अनुग्रह, विधि, माया, विवरण, वर्ण और संहार — ये उन दस गुणों के नाम हैं। अब इनके लक्षण बताये जा रहे हैं।।९३-९६।।

त्रिगुण से शूल का ग्रहण होता है। शक्ति से परशु गृहीत है। ईश्वर का प्रसाद खड्ग

विधिर्माया विवरणं वर्णं संहार एव च ।
एते दश गुणाः प्रोक्तास्तेषां लक्षणमुच्यते ।।९६।।

त्रिगुणं शूलमित्युक्तं शक्तिः परशुरीरितः ।
खड्गस्त्वीशप्रतापः स्याद् दुर्भेद्यो वज्रमिष्यते ।।९७।।

ईशस्यानुग्रहश्चैवं अभयं तु प्रशस्यते ।
विधिः स्यान्नागरूपं तु पाशो मायास्वरूपकः ।।९८।।

विवरणमङ्कुशं चैव वर्णं नादात्मकं विदुः ।
संहारस्त्वग्निरूपः स्यात् तेषामाख्याः प्रकीर्तिताः ।।९९।।

एतानि गुणरूपाणि साङ्गानि च यथाक्रमम् ।
वस्त्रोपवीतमाल्यानि गन्धाश्चाभरणं तथा ।।१००।।

तथैवावरणं चैव उपाङ्गं चेति कीर्तितम् ।
अङ्गभेदस्त्विवति प्रोक्तस्तत्स्वरूपमिहोच्यते ।।१०१।।

ध्यानस्वरूपम्

कुन्देन्दुस्फटिकाभासं जटामुकुटमण्डितम् ।
पञ्चमूर्धसमायुक्तं पञ्चवक्त्रसमायुतम् ।।१०२।।

तथा दुर्भेद्य स्थल का ग्रहण वज्र से होता है। ईश्वर का अनुग्रह अभय मुद्रा का द्योतक है। विधि शब्द नाग का तथा माया शब्द पाश का द्योतक है। विवरण शब्द से अंकुश का और वर्ण पद से नाद का ग्रहण किया जाता है। संहार शब्द से अग्नि की सूचना मिलती है। इस प्रकार शास्त्रों में दस प्रकार के गुणों, अर्थात् चिह्नों का परिचय दिया गया है।।९७-९९।।

इस तरह से तृतीय भेद सांग के गुणों और रूपों का वर्णन किया गया। अब चतुर्थ भेद उपांग का परिचय दिया जा रहा है। वस्त्र, यज्ञोपवीत, पुष्पमाला, गन्ध (चन्दन), आभरण (अलंकार) और आवरण इन सबका उपांग के रूप में ग्रहण किया जाता है। इस प्रकार चतुर्विध अंगभेद का विवरण यहाँ दिया गया है। अब सादाख्य तत्त्व के स्वरूप का वर्णन किया जा रहा है।।१००-१०१।।

हे महासेन ! ये कुन्द पुष्प (बेला), चन्द्रमा और स्फटिक के समान गौर वर्ण वाले, जटा और मुकुट से अलंकृत, पाँच मस्तक और पाँच मुखों से सुशोभित हैं। इनका प्रत्येक मुख तीन तीन नेत्रों से मण्डित है। दस भुजाओं और दो चरणों वाले ये पद्म के आसन पर विराजमान हैं। इनके दक्षिण भाग की पाँच भुजाओं में शूल, परशु, खड्ग, अभय मुद्रा और वज्र तथा वाम भाग की पाँच भुजाओं में नाग, पाश, अंकुश, घण्टा और अग्नि विराजमान हैं। सभी शुभ लक्षणों से संयुक्त, सभी अलंकारों से अलंकृत, दिव्य वस्त्रों से विभूषित यह

प्रतिवक्त्रं विशेषेण त्रिलोचनसमायुतम् ।
दिग्भुजं च महासेन द्विपादं पद्मसंस्थितम् ।।१०३।।

शूलं परशुखड्गौ चाभयवज्रे च दक्षिणे ।
नागं पाशाङ्कुशं चैव घण्टां वह्निं च वामके ।।१०४।।

सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ।
दिव्याम्बरधरं देवं दिव्यरूपमुदाहृतम् ।।१०५।।

दिव्यगन्धानुलिप्ताङ्गं दिव्यमालाविभूषितम् ।
शान्तरूपमिदं वत्स ! किञ्चित् प्रहसिताननम् ।।१०६।।

एतद्रूपं स्मरेन्नित्यं धर्मकामार्थमोक्षदम् ।
ध्यानरूपमिदं प्रोक्तं विशेषस्त्वधुनोच्यते ।।१०७।।

पञ्चाननव्यवस्था

कर्मेशं पूर्ववक्त्रं स्यात् कर्तृ स्याद् दक्षिणाननम् ।
अपरं मूर्तवक्त्रं स्यादमूर्तं चोत्तराननम् ।।१०८।।

ऊर्ध्वं तु शिवसादाख्यमेवं पञ्चाननं विदुः ।
ईशानादीनि मूर्धादि तथा कर्मान्तवद् भवेत् ।।१०९।।

देव दिव्य रूप से सम्पन्न हैं। दिव्य गन्ध से इनका सारा शरीर सुवासित है, दिव्य माला धारण किये हुए हैं। हे वत्स ! ये अत्यन्त शान्त स्वभाव के हैं और इनके मुख पर मधुर मुस्कान बिखरी हुई है। धर्म, अर्थ, काम और मोक्ष को देने वाले भगवान् के इस रूप का सदा स्मरण करते रहना चाहिये। ऊपर वर्णित भगवान् का स्वरूप ध्यान के लिये उपयुक्त है। इस विषय की कुछ विशेष बातों की अब चर्चा की जा रही है।।१०२-१०७।।

कर्मसादाख्य का मुख पूर्व दिशा में, कर्तृसादाख्य का दक्षिण में, मूर्तसादाख्य का मुख पश्चिम दिशा में और अमूर्तसादाख्य का मुख उत्तर दिशा में होता है। शिवसादाख्य मूर्ति ऊर्ध्वमुख बनाई जाती है। इस प्रकार पंचवक्त्र सादाख्यतत्त्व की व्यवस्था की गई है। शिवसादाख्य से लेकर कर्मसादाख्य पर्यन्त मूर्तियों में ईशान आदि की मूर्धा (शिर) आदि अंगों के रूप में कल्पना की जाती है।।१०८-१०९।।

पूर्व मुख पूर्व दिशा में माना गया है। पश्चिम मुख पश्चिम दिशा में, दक्षिण मुख दक्षिण दिशा में, उत्तर मुख उत्तर दिशा में और ऊर्ध्वमुख का दक्षिण भाग उत्तराभिमुख और उत्तरभाग पश्चिम-उत्तर दिशा की ओर रहता है। हे षण्मुख ! इस ऊर्ध्व वक्त्र की अपनी कुछ विशेषता है।।११०-१११।।

प्राग्वक्त्रं पूर्वमुद्दिष्टं पश्चिमं पश्चिमाननम् ।
दक्षिणाभिमुखं याम्यमुत्तरं चोत्तराननम् ।।११०।।

ऊर्ध्वे तु दक्षिणं सव्यमितरं पश्चिमोत्तरम् ।
किञ्चिदस्मिन् विशेषोऽस्ति चोर्ध्ववक्त्रे तु षण्मुख ।।१११।।

मूलसंचिततद्वक्त्रं परं मुखमिति स्मृतम् ।
पूजाकाले तु तद्ध्यात्वा ह्यर्चयेत् कर्मवक्त्रवत् ।।११२।।

कर्ममूर्ति(सदाशिव)वैशिष्ट्यम्

एवं संकल्प्य विधिवत् पूजान्ते पूर्ववद् भवेत् ।
एतत्पञ्चात्मकत्वात् तु सर्वकारणकारणम् ।।११३।।

सदाशिव इति प्रोक्तमिति शास्त्रेषु निश्चितम् ।
एतद् वै कर्मवर्मेति कर्मरूपं तु कारयेत् ।।११४।।

कर्षणादिक्रियादीनि कर्म चेति निगद्यते ।
तस्माद् वै स्थापनादीनि कर्ममूर्तौ तु कारयेत् ।।११५।।

लिङ्गे वा स्थण्डिले वापि कुम्भे वा हृदयेऽपि वा ।
ध्यात्वा सदाशिवं पूज्य विधिवत् स्थापयेत् ततः ।।११६।।

यह ऊर्ध्व वक्त्र ही सबका मूल है। इसीको श्रेष्ठ मुख कहा गया है। पूजा के समय इसीका ध्यान कर कर्मसादाख्य के समान पूजन करना चाहिये।।११२।।

इस तरह शास्त्रीय विधि के अनुसार आवाहन आदि सारी पूजाविधि को पूरा कर लेने के उपरान्त अन्त में पुनः पाँचों सादाख्यों का क्रम यथापूर्व हो जाता है। यह पंचसादात्मक स्वरूप ही सभी कारणों का भी कारण है, अर्थात् पंचतन्मात्राओं और पंचमहाभूतों की उत्पत्ति इन्हींसे होती है। शास्त्रों में इन्हीं का सदाशिव के रूप में वर्णन मिलता है। सृष्टि में कर्म रूप की प्रधानता रहने से प्रधान रूप से सभी कर्मों के प्रारंभ में इन्हींकी पूजा की जाती है।।११३-११४।।

भूमिकर्षण आदि सबको क्रिया कहा जाता है। इसीलिये स्थापन आदि कार्यों को भी कर्मसादाख्य मूर्ति में ही करना चाहिये। लिंग, स्थण्डिल, कुंभ अथवा हृदय में सदाशिव का ध्यान और पूजन करने के बाद उनकी विधिवत् प्रतिष्ठा की जाती है।।११५-११६।।

अपने हृदय में चिन्मय प्रकाश का आवाहन किया जाता है। वहाँ उनको बैठा लेना ही स्थापन है। ईश्वर का सामीप्य मुझे सदा मिलता रहे, यह भावना ही संनिधान कहलाती है। अपने हृदय में शिव के स्वरूप को बैठा लेना ही संरोधन कहलाता है।।११७।।

कर्तृसादाख्य आदि चार रूपों की स्थापना नहीं की जाती। हे गुह ! योगी जन और

आवाहनं स्वात्मनि चित्प्रकाशस्तत्र स्थितिः स्थापनमीश्वरस्य ।
सान्निध्यमात्मेश्वरसन्निधानं संरोधनं स्वस्य शिवे निरोधः ।।११७।।

कर्त्रादिकचतुर्णां तु स्थापनं च न कारयेत् ।
योगिनां मन्त्रिणां चैव स्तुतिमात्रं भवेद् गुह ।।११८।।

इत्येतैर्लक्षणैर्युक्तं कर्मसादाख्यलिङ्गकम् ।
शिवादिकर्मपर्यन्तं क्रमेणैव प्रकीर्तितम् ।।११९।।

सादाख्यलक्षणं प्रोक्तं महेशं शृणु षण्मुख ।

महेशस्वरूपम्

कर्मेशस्य सहस्रांशाद् महेशस्य समुद्भवः ।।१२०।।

महेशं सकलं विद्यात् सृष्टिस्थितिलयावहम् ।
पञ्चविंशतिभेदैस्तु तन्मूर्तिर्विविधा भवेत् ।।१२१।।

नानारूपधरं देवं नानारूपसमन्वितम् ।
नानाचिह्नसमोपेतं नानालीलामनोहरम् ।।१२२।।

स्थानयानसमासीनं नृत्तकोपमसौम्यकम् ।
अनेकाकारसंयुक्तं देवदेवं महेश्वरम् ।।१२३।।

मन्त्रों के आराधक मात्र इनकी स्तुति करते हैं।।११८।।

इन सब लक्षणों से युक्त कर्मसादाख्य लिंग का यहाँ विस्तार से वर्णन किया गया है। शिवसादाख्य से लेकर कर्मसादाख्य पर्यन्त पाँचों तत्त्वों का यहाँ क्रमशः स्वरूप वर्णित है। हे षण्मुख ! इस प्रकार सादाख्य तत्त्व का स्वरूप यहाँ विस्तार से बताया गया है। अब महेश का लक्षण सुनो।।११९-१२०।।

कर्मसादाख्य के हजारवें अंश से महेश की उत्पत्ति मानी गई है। महेश भगवान् शिव का सकल स्वरूप है। ये ही जगत् की सृष्टि-स्थिति-लय के कारण हैं। पचीस प्रकार के नाना स्वरूपों को ये धारण कर लेते हैं।।१२०-१२१।।

नाना प्रकार के आकारों को, स्वरूपों को ये धारण कर लेते हैं, नाना प्रकार के चिह्नों से ये पहचाने जाते हैं। सबके कष्टों को दूर कर देने वाले भगवान् शिव नाना प्रकार की लीलाओं को करते रहते हैं। ये भगवान् महेश्वर विविध स्थानों पर, विविध वाहनों पर आसीन रहते हैं। नृत्त, कोप या सौम्य रूप में ये दर्शन देते हैं। ये देवदेव, महेश्वर अनेक आकार धारण कर लेते हैं। जटा और मुकुट धारण करते हैं। एक मुख, तीन नेत्र और चार भुजाओं से सुशोभित हैं। पद्मासन पर विराजमान हैं। अपनी चार भुजाओं में वरद और अभय मुद्रा

जटामुकुटसंयुक्तमेकवक्त्रं त्रिणेत्रकम्।
चतुर्भुजसमायुक्तं एकपद्मासनस्थितम्।।१२४।।

वरदाभयहस्तं च मृगीपरशुधारकम्।
महेशरूपमित्युक्तं रूपभेदस्त्वथोच्यते।।१२५।।

पञ्चविंशत्यवतारा:

प्रथमं सोमधारी स्याद् द्वितीयमुमया सह।
तृतीयं च वृषारूढं चतुर्थं नृत्तरूपकम्।।१२६।।

वैवाहं पञ्चमं विद्यात् षष्ठं भिक्षाटनं भवेत्।
कामारिः सप्तमं विद्यात् कालारिश्चाष्टमं भवेत्।।१२७।।

नवमं त्रिपुरारिः स्याज्जालन्धरवधो दशम्।
एकादशमजारिः स्याद् द्वादशं वीरभद्रकः।।१२८।।

त्रयोदशं हरिध्वंसी त्वर्धनारी चतुर्दशम्।
किरातः स्यात् पञ्चदशं कङ्काली षोडशं भवेत्।।१२९।।

चण्डेशानुग्रहश्चैव तथा सप्तदशं भवेत्।
विषापहरणश्चैव अष्टादशमिति स्मृतम्।।१३०।।

को तथा मृगलांछन और परशु को धारण किये हुए हैं। इस प्रकार भगवान् महेश का यह मुख्य रूप है। इनके अन्य रूपों का वर्णन आगे किया जा रहा है।।१२२-१२५।।

इनका पहला रूप सोमधारी (शशिचूड), दूसरा उमा के साथ (उमाकान्त), तीसरा वृषारूढ, चौथा ताण्डव नृत्त रत, पाँचवाँ वैवाह रूप, छठा भिक्षाटन रत, सातवाँ काम को भस्म करने वाला, आठवाँ काल का भक्षक, नवाँ पुरत्रय का नाशक (त्रिपुरारि), दसवाँ जालन्धर का वध करने वाला, ग्यारहवाँ ब्रह्मा के दर्प का नाशक, बारहवाँ वीरभद्र का अवतार, तेरहवाँ हरिध्वंस नामक, चौदहवाँ अर्धनारीश्वर, पन्द्रहवाँ किरातवेषधारी, सोलहवाँ कंकालधारी, सत्रहवाँ चण्डेश पर अनुग्रह करने वाला, अठारहवाँ विष का अपहारक, उन्नीसवाँ विष्णु को चक्रदान करने वाला, बीसवाँ विघ्नेश (गणेश) को वर प्रदान करने वाला, इक्कीसवाँ सोमास्कन्द, बाईसवाँ एकपाद, तेईसवाँ सुखावह, चौबीसवाँ दक्षिणामूर्ति और पचीसवाँ लिंगोद्भव स्वरूप है। ये सब महेश के ही मूर्तिभेद माने गये हैं।। सोमधारी (चन्द्रचूड) से लेकर लिंगोद्भव पर्यन्त ये पचीस स्वरूप महेश की ही विभूतियाँ हैं। ये सारे रूप कर्मसादाख्य से उत्पन्न हुए हैं। इस तरह से महेश की पचीस मूतियों का स्वरूप यहाँ बताया गया है।।१२६-१३५।।

चक्रदानस्वरूपं च एकोनविंशतिः स्मृतम् ।
विघ्नप्रसादो विंशः स्यात् सोमास्कन्दस्ततः परम् ।।१३१।।

द्वाविंशमेकपादः स्यात् त्रयोविंशः सुखावहः ।
दक्षिणामूर्तिरूपं तु चतुर्विंशमितीरितम् ।।१३२।।

लिङ्गोद्भवस्वरूपं तु पञ्चविंशं प्रकीर्तितम् ।
एते महेशरूपाश्च मूर्तिभेदाः प्रकीर्तिताः ।।१३३।।

सोमधार्यादिलिङ्गान्तं कर्मणश्च समुद्भवम् ।
एते महेशरूपाश्च कर्माख्याच्च समुद्भवाः ।।१३४।।

पञ्चविंशतिभेदेन रूपभेदाः प्रकीर्तिताः ।

रुद्रादीनां समुद्भवः

महेशस्य सहस्रांशाद् रुद्रदेवसमुद्भवः ।।१३५।।

तन्महेश्वरकोट्यंशाद् विष्णुदेवसमुद्भवः ।
विष्णुदेवस्य कोट्यंशाद् ब्रह्मदेवसमुद्भवः ।।१३६।।

नेत्रदक्षिणवामोर्ध्वे सूर्यसोमाग्निसंभवः ।
घ्राणे वायुः समुत्पन्नः गणेशस्तु गलोद्भवः ।।१३७।।

षण्मुखो हृदये जातो नाभेर्देवादिसंभवः ।
पञ्चाशत्कोटिदेवाश्च महेशस्वेदसंभवाः ।।१३८।।

ऋषयश्च तथा कोट्यो रोम्णि चैव समुद्भवाः ।
तत्त्वानामुद्भवः प्रोक्तः शक्तीनामुद्भवं शृणु ।।१३९।।

इस महेश के हजारवें अंश से रुद्रदेव (महेश्वर) की उत्पत्ति होती है। महेश्वर के करोड़वें अंश से विष्णुदेव की और विष्णुदेव के करोड़वें अंश से ब्रह्मदेव के उत्पत्ति होती है। महेश्वर के दक्षिण, वाम और ऊर्ध्व नेत्रों से सूर्य, सोम और अग्नि उत्पन्न होते हैं। घ्राण से वायु, गले से गणेश, हृदय से स्कन्द और नाभि से सभी देवताओं की उत्पत्ति होती है। इस महेश के स्वेद (पसीने) से पचास करोड़ देवता और रोमकूपों से करोड़ों ऋषियों की उत्पत्ति मानी गई है।।१३५-१३९।।

इस प्रकार तत्त्वों की उत्पत्ति की प्रक्रिया को यहाँ बताया गया है। अब शक्तियों की उत्पत्ति की प्रक्रिया को सुनो। बिन्दु के दशांश से उमा शक्ति की उत्पत्ति होती है। उमा, अम्बिका, गणेशी, ईश्वरी और मनोन्मनी — ये पाँच शक्तियाँ एक-एक के दशांश से क्रमशः उत्पन्न होती हैं। ये पाँचों शिवसादाख्य आदि की शक्तियाँ हैं।।१३९-१४१।।

मनोन्मनी के हजारवें अंश से गौरी की उत्पत्ति मानी जाती है। उमा के प्रभाव से ही

शक्तीनां समुद्भवः

बिन्दुरूपदशांशेन चोमाशक्तिसमुद्भवः ।
उमाऽम्बिका गणेशी च ईश्वरी च मनोन्मनी ।।१४०।।
एकैकेन दशांशेन जायते क्रमशस्तथा ।
एता वै शक्तयः पञ्च शिवादीनां तु शक्तयः ।।१४१।।
मनोन्मनीसहस्रांशाद् गौरी जातेति कीर्तिता ।
तस्याः सरस्वती दुर्गा उमायाश्च प्रभावतः ।।१४२।।
शची ज्येष्ठा च लक्ष्मीश्च तथा चान्याश्च शक्तयः ।
कोटिशक्तय एता वै गौरीदेहसमुद्भवाः ।।१४३।।
शक्तिभेदो विशेषेण समासात् परिकीर्तितः ।
शिवादयो महेशान्ता एकत्रिंशत् प्रकीर्तिताः ।।१४४।।

पटलफलश्रुतिः

यो वेत्ति तत्त्वभेदं हि स पूजास्थापनार्हकः ।
एवं त्रिमूर्तिभेदस्तु समासात् परिकीर्तितः ।
तत्त्वभेदो मया प्रोक्तो वर्णभेदमतः शृणु ।।१४५।।

।। इति श्रीवातुले शुद्धाख्यतन्त्रे तत्त्वभेदो नाम
प्रथमः पटलः समाप्तः ।।

गौरी से सरस्वती और दुर्गा का प्रादुर्भाव होता है। इसी तरह से शची, ज्येष्ठा, लक्ष्मी और अन्य भी अनेकों शक्तियाँ हैं। ये सब करोड़ों शक्तियाँ गौरी के देह से ही उत्पन्न होती हैं। शक्तियों के भेदों को यहाँ विशेष कर संक्षेप में ही बताया गया है।।१४१-१४३।।

शिव से लेकर महेश पर्यन्त देवताओं के इकतीस भेदों का यहाँ प्रतिपादन किया गया है। जो इनके स्वरूपों के भेदक तत्त्वों को ठीक से जानता है, वही इनकी पूजा करने का और प्रतिष्ठा आदि करने का सही अधिकारी माना गया है।।१४४।।

इस तरह से तत्त्वभेद प्रकरण में त्रिविध तत्त्वों के मूर्ति (स्वरूप) के भेदों को संक्षेप में बताया गया है। अब आगे वर्णभेद के स्वरूप को सुनो।।१४५।।

।। इस तरह से श्री वातुलशुद्धाख्य तन्त्र का यह तत्त्वभेद नामक
प्रथम पटल पूरा हुआ।।१।।

❋ ❋ ❋

द्वितीयः पटलः

वर्णभेदविधिः

अथातः संप्रवक्ष्यामि वर्णभेदविधिं परम्।
मन्त्राणामुद्भवं चैव वर्णानां च समुद्भवम्॥१॥

अकारादिक्षकारान्ता एकपञ्चाशदक्षराः।
एते वर्णाः प्रशस्यन्ते कामितार्थप्रदायकाः॥२॥

स्त्रीरूपाश्चैव पुंरूपास्तथा चोभयरूपकाः।
सर्वे वै देवतारूपाः प्रत्येकं वर्णरूपधृत्॥३॥

वर्णो बीजं तथार्णश्च लिङ्गमक्षरमातृकम्।
एतानि षट् च नामानि वर्णपर्यायवाचकाः॥४॥

तेषां समुद्भवो नामरूपभेदस्तथांशकः।
तत्त्वमात्रादिभेदश्चाप्यधिदैवफलं तथा॥५॥

स्थूलसूक्ष्माकृतिं चैव जीवोपाधिविभेदकम्।
एतद्भेदं समासेन संक्षेपाच्छृणु षण्मुख॥६॥

अब मैं वर्णभेद की श्रेष्ठ विधि को बताऊँगा। वर्णों से ही मन्त्रों की उत्पत्ति होती है। वर्णों की उत्पत्ति का प्रकार भी इसी के साथ बताया जा रहा है॥१॥

अकार से क्षकार पर्यन्त वर्णों की संख्या ५१ मानी जाती है। ये सब इसलिये प्रशंसनीय हैं कि इनसे मानव को अपने इच्छित फल की प्राप्ति होती है॥२॥

ये वर्ण स्त्रीरूप, पुरुषरूप और उभय-स्वरूप भी माने जाते हैं। ये सभी देवता-स्वरूप हैं। ये ही अलग-अलग वर्णों का स्वरूप धारण कर लेते हैं॥३॥

वर्ण, बीज, अर्ण, लिंग, अक्षर, मातृका — ये सभी छः नाम वर्णों के पर्यायवाची हैं॥४॥

इनकी उत्पत्ति, नाम और रूप का भेद, अंशक का निरूपण, तत्त्वों और मात्राओं का भेद, इनके अधिदेवता और फल, स्थूल और सूक्ष्म आकृति, जीवोपाधिक भेद — इन सबको हे छः मुख वाले महासेन ! तुम संक्षेप में सुनो॥५-६॥

वर्णसमुद्भवः

शिवतत्त्वात् परात् सूक्ष्माद् बिन्दुरूपं तु जायते ।
बिन्दोर्नादः समुत्पन्नो नादाच्छक्तिरजायत ।।७।।

शक्तेस्तु जायते शब्दः शब्दाज्जातं तु वाग्भवम् ।
वाग्भवाच्च कला जाताः कलाभ्यो विकलास्तथा ।।८।।

तस्माद्वै वाचको मन्त्रो मन्त्रस्तैरेव भिद्यते ।
एष सृष्टिक्रमः प्रोक्तस्तेषां लक्षणमुच्यते ।।९।।

बिन्दुरूपा परा शक्तिर्नादश्चैवादिरुच्यते ।
शक्तिरिच्छेति विज्ञेया शब्दो ज्ञानमिहोच्यते ।।१०।।

वाग्भवं स्यात् क्रियाशक्तिः कला वै षोडश स्वराः ।
तेषां रूपं द्विधा प्रोक्तं प्रकृतिर्विकृतिस्तथा ।।११।।

प्रकृतिः सप्त वर्णाश्च विकृतिस्तु नवार्णकाः ।
अकारश्च इकारश्च उकारश्च ऋकारकः ।
लृकारश्चैव एकार ओकारश्च तथैव च ।।१२।।

एते सप्त स्वराः प्रोक्ताः प्रकृतिस्तु समीरिता ।
शेषास्तु विकृतिः प्रोक्तास्तेषामुद्भव उच्यते ।।१३।।

परमसूक्ष्म शिवतत्त्व से बिन्दु की उत्पत्ति होती है। बिन्दु से नाद उत्पन्न होता है और नाद से शक्ति की उत्पत्ति होती है। शक्ति से शब्द और शब्द से वाग्भव उत्पन्न होता है। वाग्भव से कलाओं की और कलाओं से विकलाओं की उत्पत्ति मानी गई है। विकलाओं से वाचक मन्त्रों की उत्पत्ति होती है। कलाओं और विकलाओं के कारण ही ये परस्पर एक दूसरे से भिन्न हो जाते हैं। इस प्रकार यहाँ वर्ण-सृष्टि का क्रम बताया गया है, अब तुम इनके लक्षण सुनो।।७-९।।

पराशक्ति ही बिन्दु का स्वरूप धारण करती है। आदिशक्ति नाद का, इच्छा शक्ति का, ज्ञान शब्द का और क्रियाशक्ति वाग्भव का स्वरूप धारण कर लेती है। सोलह स्वरों को कला नाम दिया गया है। प्रकृति और विकृति के रूप में इनका वर्णन किया जाता है।।१०-११।।

सात वर्णों को प्रकृति और नौ वर्णों को विकृति कहा गया है। अकार, इकार, उकार, ऋकार, लृकार, एकार और ओकार — ये सात स्वर प्रकृति वर्ण कहे जाते हैं। शेष नौ स्वर विकृति कहलाते हैं। इनकी उत्पत्ति का प्रकार बताया जा रहा है।।१२-१३।।

अकारेऽजायताकार इकारे त्वीसमुद्भवः ।
उकारे चैव ऊकार ऋकारे ॠसमुद्भवः ।।१४।।

लृकारादेव लॄकार एकारादैसमुद्भवः ।
ओकाराद् औ तथा ज्ञेयः क्रमेणैव समुद्भवः ।।१५।।

एते विकृतयः प्रोक्ता आकारादिनवार्णकाः ।
अकारादिविसर्गान्ता एते वै षोडश स्वराः ।।१६।।

नामरूपभेदः

कला मात्रा स्वरा जीवाः प्रकृतिर्विकृतिस्तथा ।
प्राण आत्मा ना च देही कलापर्यायवाचकाः ।।१७।।

एतानि दश नामानि कलास्वेव प्रयुज्ञते ।
कलाभेदस्त्वयं प्रोक्तो विकलाभेदकं शृणु ।।१८।।

ककारादिक्षकारान्ता वर्णाश्च विकलाः स्मृताः ।
ककारादीनि वर्णानि अकारादिसमुद्भवाः ।।१९।।

ओकारात् तु समुद्भूता यकारादिदशाक्षराः ।
देहोपाधिशरीराणि क्षेत्राधारौ तनुस्तथा ।।२०।।

व्यञ्जनं विकला शक्तिर्बिन्दुपर्यायवाचकाः ।
कलानां विकलानां च रूपत्रयमिहोच्यते ।।२१।।

अकार से आकार की उत्पत्ति होती है। इसी तरह से इकार से ईकार की, उकार से ऊकार की, ऋकार से ॠकार से की, लृकार से लॄकार की, एकार से ऐकार की और ओकार से औकार, अंकार और अ:कार की निष्पत्ति मानी गई है।।१४-१५।।

आकार आदि से नौ स्वर विकृति कहलाते हैं। प्रकृति और विकृति, अकार से लेकर विसर्ग पर्यन्त ये सब मिलकर सोलह स्वर होते हैं।।१६।।

कला, मात्रा, स्वर, जीव, प्रकृति, विकृति, प्राण, आत्मा, पुरुष और देही — ये दस शब्द कला के पर्याय हैं। (ये सभी नाम कलाओं के ही माने गये हैं। इस तरह से कला के भेदों को बताया गया है। अब विकला के भेदों को सुनो।।१७-१८।।

ककार से क्षकार पर्यन्त वर्णों को विकला कहा जाता है। ये सब वर्ण अकार से उत्पन्न होते हैं। ओकार से यकार आदि दस वर्ण उत्पन्न हुए हैं।) देह, उपाधि, शरीर, क्षेत्र, आधार, तनु, व्यंजन, विकला, शक्ति, बिन्दु — ये सब पर्यायवाची शब्द हैं। इस कलाओं और विकलाओं के तीन-तीन रूप होते हैं, उन्हें यहाँ बताया जा रहा है।।१९-२१।।

रूपत्रयम्

शिवाग्निभूतरुद्राश्च त्रयोदश तिथिस्तथा ।
एते वै स्वरवर्णाश्च पुंलिङ्गाश्चेति कीर्तिताः ।।२२।।

पक्षो वेदो रसो भानुर्मनुश्चैवाधिकारकम् ।
एतानि षट् च बीजानि स्त्रीलिङ्गानीति कीर्तितम् ।।२३।।

ऋ ॠ ऌ ॡ च चत्वारो नपुंसका इति स्मृताः ।
ककारश्च गकारश्च चकारश्च जकारकः ।।२४।।

टकारश्च डकारश्च तकारश्च दकारकः ।
पकारश्च बकारश्च क्षकारश्च हकारकः ।।२५।।

एते द्वादश वर्णाश्च पुंलिङ्गाश्चेति कीर्तिताः ।
खकारश्च घकारश्च छकारश्च झकारकः ।।२६।।

ठकारश्च ढकारश्च थकारश्च धकारकः ।
फकारश्च भकारश्च शकारश्च सकारकः ।।२७।।

एतानि भानुबीजानि जायाश्चेति प्रकीर्तिताः ।
शेषान् नपुंसकान् विद्यात् त्रयो भेदा इति स्मृताः ।।२८।।

शिव[१], अग्नि[३], भूत[५], रुद्र[११], त्रयोदश[१३] और तिथि[१५] ये सब स्वरवर्ण पुंलिंग कहे गये हैं। पक्ष[२], वेद[४], रस[६], सूर्य[१२], मनु[१४] और अधिकार[१६] ये छः स्वर स्त्रीलिंग हैं। ऋ ॠ ऌ ॡ ये चार स्वर नपुंसक हैं।।२२-२४।।

ककार, गकार, चकार, जकार, टकार, डकार, तकार, दकार, पकार, बकार, क्षकार और हकार — ये बारह व्यंजन पुंलिंग हैं। खकार, घकार, छकार, झकार, ठकार, ढकार, थकार, धकार, फकार, भकार, शकार, सकार — ये बारह व्यंजन स्त्रीलिंग माने गये हैं। शेष वर्ण (व्यंजन) नपुंसक कोटि में आते हैं। इस तरह से स्वरों और व्यंजनों की तीन-तीन श्रेणियाँ मानी गई हैं।।२५-२८।।

अकार आदि तीन स्वर आकाश के, ईकार आदि पवन के, ऋकार आदि अग्नि के, ॡकार आदि जल के तथा ओकार आदि तीन स्वर पृथ्वी के अंश हैं।

(ककार से ङकार पर्यन्त पांच तथा लकार और ळकार ये सात व्यंजन पृथिवी के अंश हैं। चकार आदि पाँच, वकार और शकार ये सात जल के; टकार आदि पाँच, हकार और षकार ये सात तेजस्तत्त्व के; तकार आदि पाँच, यकार और सकार ये सात वायुतत्त्व के और पकार आदि पाँच, हकार और क्षकार ये सात आकाश तत्त्व के अंश हैं। इस प्रकार यहाँ अंशकों का वर्णन किया गया है।)

अंशकविचारः

अकारादित्रयो व्योम ईकारादित्रयोऽनिलः ।
ऋकारादित्रिवर्णाश्च वैश्वानर इति स्मृताः ।।२९।।

[लृकारादित्रयो ह्याप ओकारादित्रयो मही ।
ककारादिङकारान्ता लकारश्च ळकारकः ।
पृथिव्यंशा इति ज्ञेयं चकारादीति पञ्चकम् ।।

बकारश्च शकारश्च जलांशका इति स्मृताः ।
टकारादिणकारान्ता रकारश्च षकारकः ।।

तेजोंऽशका इति ज्ञेयं तकारादीति पञ्चकम् ।
यकारश्च सकारश्च ह्यनिलांशा इति स्मृताः ।।

पकारादिमकारान्ता हकारश्च क्षकारकः ।
व्योमांशका इति ज्ञेयं ह्येषा वै त्वंशकस्मृतिः ।।]

तत्त्वमात्रादिभेदः

प्रकृतिस्तत्त्वबीजं स्याद् विकृतिर्मूर्तिरुच्यते ।।३०।।

प्रभावो विकलाः प्रोक्ता इत्येवं त्रिविधं भवेत् ।
प्रकृतिर्ह्रस्व इत्युक्ता विकृतिर्दीर्घ उच्यते ।।३१।।

एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं त्वर्धमात्रकम् ।।३२।।

देवताफलविचारः

अकारः सर्वदैवत्यो रक्तो सर्ववशीकरः ।
आकारः स्यात् परा शक्तिः श्वेतश्चाकर्षणो भवेत् ।।३३।।

प्रकृति नामक सात स्वर तत्त्वबीज तथा विकृति नामक नौ स्वर मूर्ति बीज कहलाते हैं। ककार से क्षकार पर्यन्त विकलाओं (व्यंजनों) को भाव नाम दिया गया है। इस तरह से प्रकृति, विकृति और विकलाओं को ये पर्याय नाम हैं।।२९-३१।।

इनमें से प्रकृति की ह्रस्व और विकृति को दीर्घ कहा जाता है। एक मात्रा वाला स्वर ह्रस्व और दो मात्रा का स्वर दीर्घ कहलाता है। तीन मात्रा का स्वर प्लुत है और व्यंजन की आधी मात्रा मानी गई है। प्रकृति और विकृति नामक स्वरों की और विकलाओं की ये मात्राएँ मानी गई हैं।।३१-३२।।

अकार में सभी देवताओं का वास है। इसका रंग लाल है और इसमें सबको वश में करने की सामर्थ्य है। आकार में पराशक्ति का वास है। इसका रंग श्वेत है और आकर्षण

इकारो विष्णुदैवत्यः श्यामो रक्षाकरो भवेत्।
मायाशक्तिरितीकारः पीतः स्त्रीणां वशीकरः।।३४।।

उकारो वास्तुदैवत्यः कृष्णो राज्यवशीकरः।
ऊकारो भूमिदैवत्यः श्यामो लोकवशीकरः।।३५।।

ऋकारो ब्रह्मणो ज्ञेयः पीतो ग्रहविनाशनः।
शिखण्डिरूप ॠकारो ह्यञ्जनो ज्वरनाशकः।।३६।।

अश्विनीभ्यां लृ-ॡ चैव श्वेतरक्तौ ज्वरापहौ।
एकारो वीरभद्रीयः पीतः सर्वार्थसिद्धिदः।।३७।।

ऐकारं वाग्भवं विद्यात् स्फाटिकं ज्ञानसिद्धिदम्।
ओकारमीश्वरं विद्याज्ज्योतिः सर्वफलप्रदम्।।३८।।

औकार आदिशक्तिः स्याच्छुक्लः सर्वार्थसिद्धिदः।
अंकारस्तु महेशः स्याद् रक्तवर्णः सुखप्रदः।।३९।।

अःकारः कालरुद्रश्च रक्तः पाशनिकृन्तनः।
प्राजापत्यः ककारः स्यात् पीतः पुष्टिकरो भवेत्।।४०।।

शक्ति से संपन्न है। इकार का देवता विष्णु, वर्ण श्याम और यह रक्षा करने वाला है। ईकार में मायाशक्ति का निवास है। इसका वर्ण पीत है और स्त्रियों को वश में करने की सामर्थ्य इसमें है। उकार का देवता वसु है। कृष्ण वर्ण और राज्य-वशीकरण की इसमें सामर्थ्य है। ऊकार की देवता भूमि है, वर्ण श्याम और इसमें लोक को वश में करने की सामर्थ्य है।।३२-३५।।

ऋकार का देवता ब्रह्मा, वर्ण पीत और ग्रहों के दोषों का नाश करने की सामर्थ्य इसमें हैं। ॠकार के देवता शिखण्डी, कज्जल श्याम वर्ण और इसमें ज्वरनाशक सामर्थ्य है। लृकार और ॡकार के देवता दोनों अश्विनीकुमार हैं, इनका श्वेत और रक्त वर्ण है तथा ज्वर का नाश करने की सामर्थ्य इनमें है।।३६-३७।।

एकार का देवता वीरभद्र, वर्ण पीत और सभी वांछित वस्तुओं को देने की सामर्थ्य इसमें है। ऐकार को वाग्भव कहा जाता है। सरस्वती देवता और स्फटिकसदृश वर्ण है। सर्वविध ज्ञान की सिद्धि का यह दाता है। ओकार का देवता ईश्वर है। इसका वर्ण तेजोमय है तथा यह सभी फलों को देने वाला है। औकार की देवता आदिशक्ति है। इसका वर्ण शुक्ल और यह सर्वार्थदायक है। अंकार के देवता महेश हैं, वर्ण रक्त और यह सबको सुख देने वाला है। अःकार (विसर्ग) के देवता कालरुद्र, रक्त वर्ण और पाशों को काट डालने की सामर्थ्य इसमें है।।३७-४०।।

खकारो जाह्नवीबीजं क्षीराभः पापनाशनः ।
गकारो गणबीजं स्याद् रक्ताभो विघ्ननाशनः ।।४१।।

घकारो भैरवो ज्ञेयो मुक्ताभः शत्रुनाशनः ।
ङकारः कालबीजं स्यात् कालः सर्वजयी भवेत् ।।४२।।

चकारश्चण्डरुद्रः स्यादञ्जनस्त्रिपुरापहः ।
छकारो भद्रकाली स्याद् राजावर्तो जयप्रदः ।।४३।।

जकारो जम्भहा ज्ञेयो रक्ताभश्च जयावहः ।
झकारस्त्वर्धनारी स्यात् श्यामरक्तो जयावहः ।।४४।।

ञकारः कोटिर्विज्ञेयः पीतो रोगविनाशकः ।
भृङ्गीशः स्यात् टकारस्तु रक्तः सर्वसुखावहः ।।४५।।

ठकारश्चन्द्रबीजं स्यात् श्वेतो मृत्युविनाशनः ।
डकारश्चैकनेत्रः स्यात् पीतः कालजयप्रदः ।।४६।।

ढकारो यमबीजं स्यान्नीलो मृत्युविनाशनः ।
णकारो नन्दिबीजं स्याद् रक्ताभश्चार्थसिद्धिदः ।।४७।।

ककार के प्रजापति देवता, वर्ण पीत और यह पुष्टिकर है। खकार की जाह्नवी देवता, दुग्धसदृश वर्ण और यह पाप का नाश करने वाला है। गकार गणस्वरूप, रक्त वर्ण और विघ्ननाशक है। घकार के देवता भैरव, मुक्ताभ वर्ण और यह शत्रुओं का नाशक है। ङकार के देवता काल, वर्ण कृष्ण और यह सब पर विजय प्राप्त कराने वाला है।।४०-४२।।

चकार के देवता चण्डरुद्र हैं। इसका वर्ण अंजनसदृश काला और यह तीनों तापों को हरने वाला है। छकार की देवता भद्रकाली है। राजावर्त के सदृश इसका रंग और यह जय देने वाला है। जकार का देवता इन्द्र है। इसका वर्ण रक्त और यह विजयदाता है। झकार के देवता अर्धनारीश्वर हैं। रंग श्याम-रक्त है। सर्वत्र विजय दिलाता है। ञकार का देवता कोटिरुद्र, वर्ण पीत और इसमें रोगविनाशक सामर्थ्य है।।४३-४५।।

टकार के देवता भृंगीश, वर्ण रक्त और यह सभी प्रकार के सुखों का दाता है। ठकार चन्द्रमा का बीज है। इसका वर्ण श्वेत और यह मृत्यु का निवारक है। डकार के देवता एकनेत्र, रंग पीला और यह कालजयी है। ढकार यम का बीज है, नील वर्ण और मृत्यु का नाश करता है। णकार नन्दी का बीज है। वर्ष लाल और यह सर्वार्थसिद्धिप्रद है।।४५-४७।।

तकार के देवता वास्तुपुरुष हैं, श्वेत वर्ण और यह सब पर विजय दिलाता है। थकार धर्मराज का बीज है, कुन्द पुष्प के समान श्वेत वर्ण और जयप्रद है। दकार दुर्गा का बीज,

तकारो वास्तुदैवत्यः श्वेतः सर्वजयी भवेत् ।
थकारो धर्मिणो ज्ञेयः कुन्दाभः स्याज्जयप्रदः ।।४८।।

दुर्गाबीजं दकारः स्यात् श्यामः सर्वार्थसिद्धिदः ।
धकारो धनदः प्रोक्तः पीताभश्चार्थसिद्धिदः ।।४९।।

नकारश्चैव सावित्री स्फाटिकः पापनाशनः ।
पर्जन्यस्तु पकारः स्यात् शुक्लाभो वृष्टिसिद्धिदः ।।५०।।

फकारः पाशुपत्यः स्यात् श्वेतः पाशनिकृन्तनः ।
बकारस्तु त्रिमूर्तिः स्यात् पीतः सर्वार्थसिद्धिदः ।।५१।।

भकारं भार्गवं विद्याद् रक्तं सर्वार्थसिद्धिदम् ।
मकारं मदनं विद्यात् श्यामं सर्वजयप्रदम् ।।५२।।

यकारो वायुदैवत्यः कृष्ण उच्चाटनो भवेत् ।
रकारो वह्निदैवत्यो रक्ताभः संहृतिर्भवेत् ।।५३।।

लकारस्त्ववनीबीजं पीतश्च स्तम्भनो भवेत् ।
वारुणः स्याद् वकारस्तु शुक्लाभो रोगनाशनः ।।५४।।

श्याम वर्ण और सर्वार्थसिद्धि को दिलाने वाला है। धकार धनद (कुबेर) का बीज है। पीत वर्ण और इच्छित अर्थ को देने वाला है। नकार की देवता सावित्री है। स्फटिक-सदृश उज्ज्वल श्वेत वर्ण और यह पापों का नाशक है।।४८-५०।।

पकार के देवता पर्जन्य हैं। शुक्ल वर्ण और यह वृष्टि का प्रदाता है। फकार के देवता पशुपति, श्वेत वर्ण और यह पाशों का नाशक है। बकार के देवता त्रिमूर्ति हैं। यह पीत वर्ण और सर्वार्थसिद्धि को देने वाला है। भकार के देवता भार्गव हैं। इसका वर्ण रक्त और यह सभी मनोकामनाओं को पूरा करता है। मकार के देवता मदन हैं। इसका वर्ण श्याम है। यह सर्वत्र विजय दिलाता है।।५१-५२।।

यकार के देवता वायु, कृष्ण वर्ण और यह उच्चाटन कर्म में विनियुक्त है। रकार के देवता वह्नि, रक्त वर्ण और यह संहार-कारक है। लकार की देवता पृथ्वी, पीत वर्ण और यह स्तंभनकारक है। वकार के देवता वरुण, शुक्ल वर्ण और यह रोगनाशक है।।५३-५४।।

शकार की देवता लक्ष्मी, पीत वर्ण और यह धन-धान्य का प्रदाता है। षकार की देवता सूर्य हैं। इसका वर्ण रक्त और सर्वार्थसिद्धि देता है। सकार की देवता शक्ति, वर्ण

लक्ष्मीबीजं शकारः स्याद् हेमाभः श्रीकरो भवेत् ।
षकारः सूर्यबीजं स्याद् रक्तः सर्वार्थसिद्धिदः ।।५५।।

सकारः शक्तिरूपः स्याद् रक्तः स्थितिकरो भवेत् ।
हकारः शिवबीजं स्याच्छुद्धस्फटिकसन्निभः ।।५६।।

अणिमाद्यष्टसिद्धेश्च भुक्तिमुक्त्योः प्रदायकः ।
ळकारस्त्वात्मबीजं स्याद् रक्ताभः सर्वसिद्धिदः ।।५७।।

विद्याबीजं क्षकारः स्यात् क्षीराभश्च सुखप्रदः ।
इत्येवमधिदेवत्वफलवर्णाः क्रमेण तु ।।५८।।

अकारादिक्षकारान्ताः समासात् परिकीर्तिताः ।

स्थूलसूक्ष्माकृतिविचारः

कला जीव इति ख्याता विकला देह इष्यते ।।५९।।

कलाश्च विकलाश्चैव देही देह इति स्मृताः ।
देहिरूपं द्विधा प्रोक्तं स्थूलं सूक्ष्मं तथैव च ।।६०।।

देह एको विनिर्दिष्टः केवलं सूक्ष्ममुच्यते ।
अकारादिविसर्गान्तं केवलं तु स्वराक्षरम् ।।६१।।

तत्स्थूलमिति विज्ञेयं सूक्ष्ममध्ये स्थितिर्भवेत् ।
ककारादीनि वर्णानि विकलाश्चेति कीर्तिताः ।।६२।।

रक्त और यह स्थिति (स्थिरता) को देने वाला है। हकार शिव का बीज है। इसका स्वरूप शुद्ध स्फटिक के समान उज्ज्वल है। यह अणिमा आदि आठ सिद्धियों को तथा भोग-मोक्ष को भी देने वाला है। ळकार का देवता स्वयं आत्म-तत्त्व है। इसका वर्ण रक्त और यह सर्वसिद्धिप्रद है। क्षकार का देवता विद्यातत्त्व, दुग्धसदृश श्वेत वर्ण और यह सुख का प्रदाता है। इस तरह से यहाँ अकार से क्षकार पर्यन्त वर्णों के देवता, वर्ण और उनसे प्राप्त होने वाले फलों का संक्षेप में वर्णन किया गया है।।५५-५९।।

कला जीव के नाम से प्रसिद्ध है और विकला को देह कहा जाता है। कला और विकला को देही (जीव) और देह (शरीर) के रूप में जाना जाता है। देही (स्वराक्षर) स्थूल और सूक्ष्म के भेद से द्विविध है। देह (व्यंजन) का सूक्ष्म नामक केवल एक ही भेद है। अकार से विसर्ग पर्यन्त वर्ण केवल स्वर कहलाते हैं। इनको स्थूल माना जाता है। सूक्ष्म (व्यंजन) वर्णों के बीच में इनकी स्थिति मानी जाती है। ककार आदि वर्णों (व्यंजनों) को विकला कहा जाता है। ये अर्धमात्रा स्वरूप हैं। इन्हीं की सूक्ष्म भेद में गिनती की जाती है। इस तरह से कला को स्थूल और विकला को सूक्ष्म आकृति वाला माना जाता है।।६०-

तद्रूपं चार्धमात्रं तु सूक्ष्मरूपमिहोच्यते ।
एवं कला च विकला स्थूलसूक्ष्माकृतिर्भवेत् ।।६३।।

जीवोपाधिविचार:

कलानां तत्त्ववर्णाश्च संजीवार्णा इति स्मृताः ।
कलाहीनं तु यद्वर्णं देहं तस्य विनिर्दिशेत् ।।६४।।

देहिदेहे सुसंयोज्य जीवे जीवं न योजयेत् ।
सर्वेषां देहभेदोऽस्ति ह्यात्मभेदो न विद्यते ।।६५।।

आत्मा च जीव इत्युक्तो जीवः शिव इति स्मृतः ।
तस्माज्जीवात् परं नास्ति पश्चादन्यं न निर्दिशेत् ।।६६।।

तस्माद् वै जीवदेहेषु कलाबीजं सुयोजयेत् ।
प्रत्येकं वर्णरूपं च देवतात्मकमुच्यते ।।६७।।

मन्त्रोद्धार-बीजन्यासौ

देवानां बीजनामानि वर्णास्तत्र प्रकल्पिताः ।
तस्माद् बीजानि चोक्तानि ज्ञात्वा मन्त्रान् समुद्धरेत् ।।६८।।

६३॥

कलाओं (स्वरों) में पांच वर्ण जीव वर्ण कहे जाते है। कलाक्षरों से रहित वर्ण (व्यंजन) को देह (स्वर) से संयुक्त करना चाहिये। देही (व्यंजन) को देह (स्वर) से भली- भाँति संयुक्त किया जाता है, किन्तु जीव स्वरों में जीव को नहीं जोड़ा जाता। स्वरों की भिन्नता के रहते हुए भी आत्मा (तत्त्वों के बीजों) का भेद नहीं माना जाता॥६४-६५॥

आत्मा (बीजाक्षर) और जीव (स्वर) में कोई भेद नहीं है। जीव (स्वर) और शिव में भी कोई अन्तर नहीं है। इसीलिये स्वरों के आगे और पीछे भी कुछ जोड़ा नहीं जाता, केवल स्वर और व्यंजन के साथ कलाओं के बीजाक्षरों को जोड़ा जाता है यह भी जान लेना चाहिये कि प्रत्येक वर्ण किसी न किसी देवता का स्वरूप है॥६६-६७॥

देवताओं के नाम बीजात्मक माने गये हैं और इनके लिये वर्णों की कल्पना की गई है। इसीलिये बीजों का भी उपदेश यहाँ किया गया है। इनके स्वरूप को जान लेने पर मन्त्रों का उद्धार भी किया जा सकता है॥६८॥

देवतामूर्ति की स्थापना और लिंग की स्थापना के समय, उत्सव आदि के अवसर पर, दीक्षा के समय, पवित्रीकरण और सकलीकरण के अवसर पर बुद्धिमान् व्यक्ति को

देवतास्थापनाकाले लिङ्गे वा कौतुकेऽपि वा ।
दीक्षायां प्रोक्षणे काले सकलीकरणे तथा ।।६९।।

बीजानि विन्यसेद् धीमान् मूर्धादिक्रमशस्तथा ।
एवमेव क्रमेणैव ज्ञात्वा वर्णान् विशेषतः ।।७०।।

तत्तद्वर्णाकृतिं ध्यात्वा जपेत् सर्वार्थसिद्धिदाम् ।
वर्णभेदो मया प्रोक्तश्चक्रभेदमतः शृणु ।।७१।।

।। इति श्रीवातुले शुद्धाख्यतन्त्रे वर्णभेदो नाम
द्वितीयः पटलः समाप्तः ।।

मूर्धा (सिर) से लेकर पादपर्यन्त क्रमशः बीजन्यास करना चाहिये।।६९-७०।।

इसी तरह से क्रमशः वर्णों की विशेषताओं को समझ कर उन-उन वर्णों की आकृति का ध्यान और जप करे। इससे साधक को सभी सिद्धियाँ प्राप्त होती हैं। हे स्कन्द ! सभी तरह से वर्णभेद को मैंने तुम्हें समझा दिया है। अब तुम चक्रभेद को सुनो।।७०-७१।।

।। इस तरह से श्री वातुलशुद्धाख्य तन्त्र का यह वर्णभेद नामक
द्वितीय पटल पूरा हुआ ।। २ ।।

❋ ❋ ❋

तृतीयः पटलः

अथातः संप्रवक्ष्यामि चक्रभेदविधिं परम्।
सर्वदेवप्रियार्थाय सर्वलोकहिताय च ।।१।।

मन्त्राणां बोधनार्थाय चक्ररूपं प्रकीर्तितम्।
सर्वदेवमयं चक्रं सर्ववर्णात्मकं विदुः ।।२।।

चक्ररूपं तु तत् साक्षाच्छिवज्ञानस्वरूपकम्।
तस्मात् तस्य स्वरूपं तु लक्षणं चाधिदैवतम् ।।३।।

वर्णन्यासक्रमं चैव संक्षेपाच्छृणु षण्मुख।

चक्रोद्धारस्थानानि

महेन्द्रे मलये सह्ये केदारे मन्दराचले ।।४।।

गङ्गातीरे तथा विन्ध्ये गह्वरे वार्धितीरके।
शिवालये गवांगोष्ठे नदीतीरतडागयोः ।।५।।

अन्येषु शुद्धदेशेषु देशिकस्य गृहेऽपि वा।
इत्युक्तेषूक्तदेशेषु चक्रमुद्धारयेत् क्रमात् ।।६।।

अब मैं चक्रभेद की श्रेष्ठ विधि को बता रहा हूँ। सभी देवताओं की प्रीति के लिये, समस्त लोक के कल्याण के लिये और मन्त्रों के उद्धार के लिये, उनके सही स्वरूप की जानकारी के लिये चक्र के स्वरूप का ज्ञान अपेक्षित है। इस चक्र में सभी देवता निवास करते हैं, सभी वर्णों की भी इसमें स्थिति रहती है। चक्र का स्वरूप साक्षात् शिव- ज्ञान का प्रतिनिधि है। इसीलिये मैं उसके स्वरूप को, लक्षण को, उसमें स्थित देवताओं को और उसमें वर्णों के विन्यास के क्रम को संक्षेप में बता रहा हूँ। हे स्कन्द ! उसे तुम सावधानी से सुनो ॥१-४॥

महेन्द्र, मलय, सह्य, केदार, मन्दराचल, विन्ध्य आदि पर्वत-शिखरों पर, गंगा नदी के तट पर, पर्वतों की गुफाओं में, समुद्र के तट पर, शिवालय में, गोशाला में, नदियों और तालाबों के किनारे तथा इसी तरह के अन्य भी पवित्र स्थलों पर अथवा दीक्षागुरु के घर पर भी — इन सभी स्थानों में से कहीं भी चक्र की रचना करनी चाहिये।॥४-६॥

कल्याणप्रद, सुन्दर, समतल भूमि को चुनकर वहाँ नाभिपर्यन्त गहराई तक उसे

चक्रनिर्माणप्रकारः

भूप्रदेशे शुभे रम्ये निम्नोन्नतविवर्जिते ।
नाभिमात्रं खनित्वा कुं पांशुना पूरयेत् ततः ।।७।।

तस्योर्ध्वे मण्डपं कुर्याद् द्वादशस्तम्भसंयुतम् ।
चतुर्द्वारसमायुक्तं रन्ध्राष्टभिरलङ्कृतम् ।।८।।

वितानध्वजसंयुक्तं दर्भमालाविराजितम् ।
सर्वालङ्कारसंयुक्तं तरङ्गेणैव वेष्टितम् ।।९।।

दर्पणोदरसंकाशं गोमयेनानुलेपयेत् ।
देशिकस्तु शुचिर्भूत्वा क्षीरभुग् विजितेन्द्रियः ।।१०।।

पूर्वरात्राधिवासी च प्रभाते यन्त्रमुद्धरेत् ।
सुस्नायाचम्य विधिवत् सकलीकृतविग्रहः ।।११।।

पुण्याहं वाचयित्वा च प्रोक्षयेद् रुद्रियेण कुम् ।
रङ्गेण धातुना चैव तन्मध्ये चक्रमालिखेत् ।।१२।।

पूर्वापरगतं तत्र युग्मसूत्रं तु कारयेत् ।
विस्तारं द्वादशाङ्गुल्यं तथा वै दक्षिणोत्तरम् ।।१३।।

खोद कर उस गड्ढे को पवित्र मिट्टी से भर देना चाहिये। उसके ऊपर मण्डप का निर्माण करे। यह मण्डप बारह खंभों वाला, चार द्वारों और आठ खिड़कियों से अलंकृत होना चाहिये। इसे चंदोवा से ढंक दे और ध्वज, दर्भमाला, झालर आदि से उसे अलंकृत करे। मण्डप के भीतर की जमीन को लीप कर दर्पण के समान उसे चमकीली बना दे।।७-१०।।

आचार्य पवित्र होकर केवल दुग्ध का आहार करे। अपनी इन्द्रियों को वश में रखता हुआ पूर्वरात्रि में अधिवास-विधि का पालन करते हुए प्रातःकाल यन्त्र का उद्धार करे। चक्र का उद्धार करने से पहले नदी आदि तीर्थस्थल पर विधिपूर्वक भलीभाँति स्नान कर, सकलीकरण की प्रक्रिया से कलान्यास आदि के द्वारा बाह्य और आन्तर शुद्धि को संपन्न कर, पुण्याह वाचनपूर्वक श्रीरुद्र मन्त्रों से सारे मण्डप को शुद्ध जल छिड़क कर पवित्र करे।।१०-१२।।

नाना प्रकार के रंगों से तथा गैरिक आदि धातुओं से उस मण्डप के बीच में चक्र की रचना करनी चाहिये। रंगे हुए दो धागों की सहायता से पूर्व और पश्चिम तथा दक्षिण और उत्तर दिशाओं में बारह-बारह अंगुल की रेखाएँ खींचकर चतुष्कोण बनाना चाहिये। इस चतुरस्र भाग के बीच में एक वृत्त बना कर उसमें कर्णिका की रचना की जाती है।



क
ख
ग
अ
आ
स
क्ष
ह
ळ

मध्यमे चतुरस्रे तु वृत्तं तत्कर्णिका भवेत्।
युग्माङ्गुलेन तद्बाह्ये त्रिवृत्तं भ्रामयेद् बुधः ।।१४।।
एकाङ्गुलेन तद्बाह्ये त्रीणि वृत्तानि कारयेत्।
बाह्ये तु मुकुलाकारान् द्वात्रिंशत् परितो लिखेत् ।।१५।।
कर्णिकायाश्च परितश्चाष्टपत्राणि वै लिखेत्।
तद्बाह्ये चाष्टपत्राणि कृत्वा चोपदलानि च ।।१६।।
अष्टदिक्षु समन्तात्तु पक्षे पक्षे गुणान् गुणान्।
तृतीयावरणे बाह्ये दलान्युपदलान्युत ।।१७।।
कर्णिकामध्यके कुर्याद् रन्ध्रं तत्सूक्ष्मकर्णिका।
तद्बाह्ये परितो लेख्यं चतुष्पत्रं सकेशरम् ।।१८।।
राजसेनैव सूत्रं तु सात्त्विकेन दलानि वै।
कर्णिकां पीतवर्णेन बीजानि तामसेन तु ।।१९।।
रक्तकृष्णसितेनैव बाह्यवृत्तत्रयं लिखेत्।
तद्बाह्ये मुकुलान् सर्वान् रक्तवर्णेन लेखयेत् ।।२०।।
चक्रन्यासो मया प्रोक्तो देवतान्यास उच्यते।

इसके बाहरी भाग में दो अंगुल जगह छोड़कर एक-एक अंगुल के अन्तर से तीन वृत्त बनाये जाते हैं तथा इन सबके बाहर चारों तरफ मुकुलित कमलों की बत्तीस आकृतियाँ बनानी चाहिये। कर्णिका के बाहर के पहले वृत्त में अष्टदल कमल, दूसरे वृत्त में आठ दल और आठ उपदल तथा तृतीय वृत्त में चारों तरफ की आठ दिशाओं में तीन-तीन दलों और उपदलों की रचना की जाती है। कर्णिका भाग के बीच में एक रन्ध्र बनाया जाता है। इसे सूक्ष्म कर्णिका कहते हैं। इसके बाहरी भाग में चतुष्पत्र कमल की तथा उसके भीतर केसरों (तन्तुओं) की रचना करनी चाहिये। इन तन्तुओं को लाल रंग से, दलों (पत्रों) को सफेद रंग से, कर्णिका को पीले रंग से और बीजों को काले रंग से रंगा जाता है। बाहरी तीन वृत्तों को भी क्रमशः लाल, काले और सफेद रंग से रंगना चाहिये। इनमें विद्यमान सभी मुकुलों को लाल वर्ण से लिखा जाता है। इस तरह से यह चक्रलेखन की प्रक्रिया पूरी होती है। अब इसमें देवताओं के न्यास का प्रकार बताया जा रहा है।।१३-२१।।

कर्णिका के मध्य में आधार शक्ति की पूजा करनी चाहिये। चतुष्पत्र कमल में अम्बिका आदि चार शक्तियाँ की तथा प्रथम आवरण में वामा आदि आठ शक्तियों की, द्वितीय आवरण में अष्टमूर्ति शिव और आठ गणेशों की तथा तृतीय आवरण में आठ विघ्नेशों, आठ लोकपालों

देवतान्यासप्रकार:

कर्णिकामध्यके पूज्या शक्तिराधाररूपिणी ।।२१।।

अम्बिकादिचतुःशक्तीश्चतुष्पत्रेषु संयजेत् ।
वामादिशक्तीश्चाष्टौ तु प्रथमावरणे यजेत् ।।२२।।

अष्टमूर्तिगणेशांश्च द्वितीयावरणे यजेत् ।
विद्येशान् लोकपालांश्च वसूंश्चैव तृतीयके ।।२३।।

बाह्यरेखात्रये पूज्यं मण्डलत्रितयं तथा ।
तत्पत्रे मुकुलाकारे वास्तुदेवान् प्रपूजयेत् ।।२४।।

गन्धपुष्पादिभिश्चैव पूर्वादीनि स्वनामतः ।
देवतान्यास एवोक्तो वर्णन्यासस्त्वथोच्यते ।।२५।।

वर्णन्यासप्रकार:

कर्णिकायां तु तन्मध्ये शिवबीजं तु विन्यसेत् ।
पूर्वपत्रे न्यसेद् बिन्दुमात्मबीजं तु दक्षिणे ।।२६।।

वारुणे सूक्ष्मनादं तु विद्याबीजं तथोत्तरे ।
एवं तत्तद्दले न्यस्येत् पञ्चरूपं षडानन ।।२७।।

और आठ वसुगणों की पूजा करनी चाहिये। बाहर की तीन रेखाओं में अग्नि, सोम और सूर्य नामक मण्डलों की उपासना की जाती है। इसके बाहर के मुकुलाकार पत्रों में वास्तुदेवों की पूजा करनी चाहिये। यह पूजा गन्ध, पुष्प आदि से की जाती है। देवताओं के नामों का उच्चारण करते हुए यह पूजा पूर्व दिशा से आरंभ हो ईशान दिशा तक क्रमशः की जाती है। इस तरह देवतान्यास का क्रम पूरा होता है। अब वर्णन्यास का क्रम कहा जा रहा है।।२१-२५।।

कर्णिका के मध्य में शिवबीज हकार का न्यास करे। कमल के पूर्व पत्र में बिन्दु का, दक्षिण पत्र में आत्मबीज ळकार का, पश्चिम पत्र में सूक्ष्म नाद का तथा उत्तर पत्र में विद्याबीज क्षकार का न्यास करे। इस तरह से हे षडानन ! कर्णिका के मध्य में और उसके चतुष्पत्रों में इन पाँच बीजाक्षरों का न्यास करना चाहिये। प्रथम आवरण के आठ, द्वितीय के सोलह और तृतीय के चौबीस दलो-उपदलों में वर्णों का विन्यास इस तरह से किया ज़ाता है — सँ षँ शँ वँ लँ रँ यँ मँ ये आठ प्रथम आवरण के बीजाक्षर हैं। अँ आँ, इँ ईँ, उँ ऊँ, ऋँ ॠँ, ऌँ ॡँ, एँ ऐँ, ओँ औँ, अं अः ये सोलह द्वितीय आवरण के बीजाक्षर हैं। इसी तरह से कँ खँ गँ, घँ ङँ चँ, छँ जँ झँ, ञँ टँ ठँ, डँ ढँ णँ, तँ थँ दँ, धँ नँ पँ, फँ बँ भँ ये चौबीस

तत्तद्वाह्यदले सर्वान् क्रमाद् वर्णान् प्रविन्यसेत् ।
एकद्वित्रितये चैव एकद्वित्रितयं न्यसेत् ।।२८।।

सं च अं च समूर्तिं च कं च भावं च गं च वै ।
षं च इं च समूर्तिं च घं च भावं च चं च वै ।।२९।।

शं च उं च समूर्तिं च छं च भावं च झं च वै ।
बं च ऋं च समूर्तिं च ञं च भावं च ठं च वै ।।३०।।

लं च लृं च समूर्तिं च डं च भावं च णं च वै ।
रं च एं च समूर्तिं च तं च भावं च दं च वै ।।३१।।

यं च ओं च समूर्तिं च धं च भावं च पं च वै ।
मं च अं च समूर्तिं च फं च भावं च भं च वै ।।३२।।

एतान् वर्णांश्च पूर्वादीन् विन्यसेत् प्रथमादिषु ।
एतच्चक्रं महासेन रहस्यमतिदुर्लभम् ।।३३।।

वर्णानामधिदेवांश्च पूजयेत्तु यथाक्रमम् ।
प्रासादादीनि मन्त्राणि सर्वमस्मिन् व्यवस्थितम् ।।३४।।

चक्रपूजा-धारणफलम्

तच्चक्रं पूजयेन्नित्यं सर्वपूजासमं भवेत् ।
रोचनाकुङ्कुमोपेतैः कर्पूरागुरुचन्दनैः ।।३५।।

तृतीय आवरण के बीजाक्षर हैं। इन श्लोकों में समूर्ति शब्द सवर्ण दीर्घ स्वर का तथा भाव शब्द महाप्राण वर्ण का द्योतक है। इन तरह से इस वर्णचक्र में सभी वर्णों का विन्यास हो जाता है। इन वर्णों के विन्यास का क्रम भी देवपूजा के क्रम का ही अनुसरण करता है, अर्थात् पूर्व से लेकर ईशान कोण पर्यन्त प्रथम आवरण में एक-एक, द्वितीय आवरण में दो-दो तथा तृतीय आवरण में तीन-तीन अक्षरों का न्यास किया जाता है। हे महासेन ! वर्णचक्र का यह रहस्य बहुत कठिनाई से समझ में आता है॥२६-३३॥

वर्णों के अधिपति देवताओं की भी उसी क्रम से पूजा करे। प्रासाद आदि सभी मन्त्रों की स्थिति इस वर्णचक्र में विद्यमान है, अर्थात् सभी मन्त्रों का उद्धार इस वर्ण- चक्र की सहायता से ही किया जाता है। इस वर्णचक्र की 'प्रतिदिन' पूजा करनी चाहिये। इस पूजा से सभी देवताओं की पूजा का फल प्राप्त हो जाता है॥३४-३५॥

गोरोचन, केसर, कपूर, अगुरु और चन्दन का घोल बनाकर भूर्जपत्र पर इस वर्णचक्र को लिखकर उसका यन्त्र बना ले और उसको मस्तक पर धारण करे। ऐसा करने से साधक की सभी कामनाएँ पूरी हो जाती हैं, उसे धन-धान्य आदि की प्राप्ति होती है। दीर्घायु, निरन्तर स्वास्थ्य, सर्वविध ऐश्वर्य की प्राप्ति होती है, पुत्र-पौत्र आदि के रूप में निरन्तर वंशवृद्धि

भूर्जपत्रे लिखेच्चक्रं गुलिकां कारयेद् बुधः ।
शिरसा धारयित्वा तु सर्वकामार्थसिद्धिदम् ।।३६।।

आयुरारोग्यमैश्वर्यं पुत्रपौत्रादिवर्धनम् ।
सर्वरक्षाकरं चैव सर्वव्याधिविदारणम् ।।३७।।

सर्वदुःखप्रशमनं सर्वक्षुद्रनिवारणम् ।
भूतप्रेतपिशाचाश्च वेतालब्रह्मराक्षसाः ।।३८।।

यन्त्ररूपधरं दृष्ट्वा दूरं गच्छन्ति भीरवः ।
चक्रभेदो मया प्रोक्तो वर्गभेदमथ शृणु ।।३९।।

।। इति श्रीवातुले शुद्धाख्यतन्त्रे चक्रभेदो नाम
तृतीयः पटलः समाप्तः ।।

होती रहती है। इसके धारण करने से सभी प्रकार के दुःखों का नाश हो जाता है, सभी तरह के छोटे-मोटे उपद्रव शान्त हो जाते हैं। भूत, प्रेत, पिशाच, वेताल, ब्रह्मराक्षस जैसे सभी दुष्ट जीव इस यन्त्र के धारण करने वालों को देखकर भय के मारे दूर भाग जाते हैं।।३५-३९।।

इस तरह से मैंने तुम्हें चक्रभेद का उपदेश किया है, अब तुम वर्गभेद को सुनो।।३९।।

।। इस तरह से श्री वातुलशुद्धाख्य तन्त्र का यह चक्रभेद नामक तृतीय पटल पूरा हुआ ।।३।।

❋ ❋ ❋

चतुर्थः पटलः

त्रिविधो वर्गः

वर्गभेदं प्रवक्ष्यामि समासाच्छृणु षण्मुख ।
वर्गस्तु त्रिविधः प्रोक्तः प्रथमः स्थितिरुच्यते ।।१।।

सृष्टिवर्गो द्वितीयः स्यात् संहारस्तु तृतीयकः ।
स्थितिमार्गस्त्रिवर्गः स्यात् सृष्टिरष्टविधा भवेत् ।।२।।

संहारः पञ्चवर्गः स्यात् तेषां लक्षणमुच्यते ।

स्थितिक्रमः

चक्रे यथा स्थिता वर्णास्तथा वै स्थितिरीरिता ।।३।।

सकाराद्यष्टवर्णांश्च प्रथमावरणे लिखेत् ।
प्रथमो वर्ग इत्युक्तः सात्त्विकं नामधेयकम् ।।४।।

द्वितीयावरणे वर्णा अकाराद्याश्च षोडश ।
द्वितीयो वर्ग इत्युक्तो राजसं संप्रकीर्तितम् ।।५।।

तृतीये तु ककारादिचतुर्विंशतिवर्णकाः ।
तृतीयो वर्ग इत्युक्तस्तामसं नामधेयकम् ।।६।।

अब मैं वर्गभेद के स्वरूप को संक्षेप में सुना रहा हूँ, हे षण्मुख ! उसे तुम सावधानी से सुनो। वर्ग तीन प्रकार का होता है। इनमें पहला स्थितिवर्ग, दूसरा सृष्टिवर्ग और तीसरा संहारवर्ग कहलाता है। स्थितिवर्ग के पुनः तीन भेद, सृष्टिवर्ग के आठ भेद और संहारवर्ग के पाँच भेद होते हैं। क्रमशः इन सबके लक्षण यहाँ बताये जा रहे हैं।।१-३।।

वर्णचक्र में जिस रूप में वर्णों का विन्यास किया जाता है, उसे स्थितिवर्ग कहा जाता है। प्रथम आवरण में सकार आदि आठ वर्णों का विन्यास किया जाता है। यह पहला वर्ग सात्त्विक नाम से जाना जाता है। द्वितीय आवरण में अकार आदि षोडश वर्णों को लिखा जाता है। इसे द्वितीय वर्ग कहा जाता है और इसे राजस संज्ञा दी गई है। तृतीय आवरण में ककार आदि चौबीस वर्णों का विन्यास विहित है। यह तृतीय वर्ग तामस नाम से जाना जाता है। स्थितिमार्ग के त्रिविध वर्गों का यहाँ इस तरह से परिचय दिया गया है। पंचविध

वर्गभेदो मया प्रोक्तः स्थितिमार्गे प्रकीर्तितः।
पञ्च प्रासादमन्त्रांश्च स्थितिमार्गेण चोद्धरेत्॥७॥

सृष्टिक्रमः

एवं स्थितिक्रमः प्रोक्तः सृष्टिमार्गं ततः शृणु।
अकारादिक्षकारान्तं वर्णानां सृष्टिरुच्यते॥८॥

तस्मात् सृष्टिक्रमेणैव वक्ष्यन्ते चाष्टवर्गकाः।
अवर्गं प्रथमं विद्यादैन्द्रवर्ग उदाहृतः॥९॥

द्वितीयस्तु कवर्गश्च वह्निवर्गः प्रकीर्तितः।
चवर्गस्तु तृतीयश्च याम्यवर्ग उदाहृतः॥१०॥

टवर्गस्तु चतुर्थश्च नैर्ऋतो वर्ग उच्यते।
पञ्चमस्तु तवर्गश्च वारुणो वर्ग ईरितः॥११॥

षष्ठं विद्यात् पवर्गं च मरुद्वर्ग उदाहृतः।
सप्तमस्तु यवर्गश्च कौबेरो वर्ग ईरितः॥१२॥

शवर्गं चाष्टमं विद्यादीशवर्ग उदाहृतः।
एते वै चाष्टवर्गास्ते सृष्टिमार्गे समीरिताः॥१३॥

सदाशिवस्य मन्त्राणां पञ्चब्रह्माऽङ्गमेव च।
सौम्यमन्त्रान् समस्तांश्च सृष्टिमार्गेण चोद्धरेत्॥१४॥

संहारक्रमः

एवं सृष्टिक्रमः प्रोक्तः संहारं च ततः शृणु।
क्षकारादि-अकारान्तं संहार इति कीर्तितः॥१५॥

प्रासाद मन्त्रों का उद्धार स्थिति मार्ग से ही किया जाता है। इस तरह स्थितिक्रम का यह स्वरूप बताया गया है॥४-८॥

अब सृष्टिमार्ग का स्वरूप बताया जा रहा है। अकार से लेकर क्षकार पर्यन्त विन्यस्त वर्णों के क्रम को सृष्टिमार्ग कहा जाता है। इस सृष्टिक्रम में ही वर्णों के आठ वर्गों का उपदेश शास्त्रों में किया गया है। इनमें पहला अवर्ग (१६ स्वर) ऐन्द्र वर्ग कहलाता है। दूसरा कवर्ग वह्नि वर्ग, तीसरा चवर्ग याम्य वर्ग, चौथा टवर्ग नैर्ऋत वर्ग, पाँचवां तवर्ग वारुण वर्ग, छठा पवर्ग मरुद्वर्ग, सातवाँ यवर्ग कौबेर वर्ग और आठवाँ शवर्ग ईश वर्ग कहलाता है। अभिप्राय यह है कि इन आठ वर्गों के इन्द्र, वह्नि, यम, राक्षस, वरुण, वायु, कुबेर और ईशान ये आठ आधिपति देवता हैं। सृष्टिमार्ग के ये ही आठ वर्ग हैं। सदाशिव के समस्त मन्त्रों का, पंचब्रह्म एवं षडंग मन्त्रों का और अन्य समस्त सौम्य मन्त्रों का उद्धार इस सृष्टिमार्ग के अनुसार ही किया जाता है। इस तरह से सृष्टिक्रम यहाँ वर्णित है॥९-१५॥

अब संहारमार्ग का स्वरूप सुनो। क्षकार से लेकर अकार पर्यन्त वर्णों के विपरीत

क्षकारादियकारान्तं दशार्णं प्रथमं विदुः ।
पार्थिवो वर्ग इत्युक्तो मकारादिदशाक्षरम् ।।१६।।

द्वितीयो वर्ग इत्युक्तो ह्यापोवर्ग उदाहृतः ।
णकारादिचकारान्तं तृतीयं चानलं विदुः ।।१७।।

ङकारादि-चैकारान्तं दशार्णं मारुतं विदुः ।
एकारादि-ह्यकारान्तं रुद्रार्णं व्योमवर्गकम् ।।१८।।

एते वै पञ्चवर्गाश्च संहारे तु प्रकीर्तिताः ।
समस्तान् रुद्रमन्त्रांश्च संहारेण समुद्धरेत् ।।१९।।

एवं त्रिवर्गभेदास्ते कीर्तिताश्च समासतः ।
वर्गभेदो मया प्रोक्तो वर्णनामान्यथ शृणु ।।२०।।

हकारादिवर्णपर्यायाः

चक्रे तु कर्णिकादीनि वर्णानि च यथाक्रमम् ।
वक्ष्ये नामानि संक्षेपाच्छृणु तत्त्वं शिवादिकम् ।।२१।।

नादं गुह्यं परं जीवं देही भूतं च पञ्चमम् ।
सान्तं तत्त्वान्तभूतान्तं शिवार्णं शून्यमव्ययम् ।।२२।।

क्रम को संहारमार्ग कहा जाता है। यहाँ क्षकार से लेकर यकार पर्यन्त दस वर्णों का प्रथम वर्ग बनता है। इसे पार्थिव वर्ग कहते हैं। मकार से लेकर तकार पर्यन्त दस वर्णों का द्वितीय वर्ग जलीय वर्ग कहलाता है। णकार से लेकर चकार पर्यन्त दस वर्णों के तृतीय वर्ग को वह्नि वर्ग, ङकार से लेकर ऐकार पर्यन्त दस वर्णों के चतुर्थ वर्ग को मारुत वर्ग और एकार से लेकर अकार पर्यन्त ११ वर्णों के पंचम वर्ग को व्योम वर्ग कहा जाता है। ये संहारमार्ग के पाँच वर्ग हैं। समस्त रुद्र-मन्त्रों का उद्धार इस संहारमार्ग से किया जाता है। इस तरह से त्रिविध वर्गभेद का परिचय संक्षेप में दिया गया है। इस वर्गभेद को बताने के बाद अब वर्णों के पर्यायों को यहाँ बताया जा रहा है।।१६-२०।।

वर्णचक्र के कर्णिका आदि स्थानों में शास्त्रनिर्दिष्ट पद्धति से वर्णों का विन्यास किया जाता है। आगे इनके पर्यायनामों का और इनके स्वरूप का परिचय दिया जा रहा है।।२१।।

नाद, गुह्य, पर, जीव, देही, भूत, पंचम, सान्त, तत्त्वान्त, भूतान्त, शिवार्ण, शून्य, अव्यय — ये सब शिवबीज रूपी हकार के पर्याय हैं। सूक्ष्मरूप और घोषरूप होने से इसे **नाद** कहा जाता है। चराचर समस्त भूतों के हृदय में जीव के रूप में यह छिपकर बैठा हुआ है, अतः इसे **गुह्य** कहते हैं। समस्त भावों से ऊपर विद्यमान रहने से इसे **पर** कहा जाता है। जीव शिव का ही स्वरूप है, इस अभेद का बोधक होने से हकार को **जीव** कहा जाता है। शिव से पृथ्वी पर्यन्त समस्त देहों का स्वामी होने से इसे **देही** कहा गया है। अकाय

सूक्ष्मत्वाद् घोषरूपत्वान्नादमित्यभिधीयते ।
चराचरादिभूतेषु जीवरूपं हृदि स्थितम् ।।२३।।
तस्माद् गुह्यमिदं प्रोक्तं परं भावात् परं स्थितम् ।
जीवः शिव इति ज्ञेयस्तस्माज्जीवः शिवः स्मृतः ।।२४।।
शिवाद्यवनिपर्यन्तं देहत्वाद् देहि चोच्यते ।
अकायत्वादजीवत्वाद् भूतं चेति प्रकीर्तितम् ।।२५।।
तत्त्वाद्येन क्रमाद् व्योम पञ्चतत्त्वाच्च पञ्चमम् ।
सकारस्य परं तस्मात् सान्तं चेति प्रकीर्तितम् ।।२६।।
तत् कलादिशिवान्तत्वात् तत्त्वान्तमिति कीर्तितम् ।
पृथिव्यादिक्रमाद् व्योम भूतान्तमिति कीर्तितम् ।।२७।।
सर्वव्यापिप्रभावत्वाच्छिवार्णं चेति कीर्तितम् ।
वाङ्मनोऽतीतभावत्वाच्छून्यं चेति प्रकीर्तितम् ।।२८।।
अक्षीणत्वान्महासेन अव्ययं चेति कीर्तितम् ।
पर्यायनामान्येतानि हकारस्य स्मृतानि च ।।२९।।
कर्णिकासंस्थितं बीजमिदं च परिकीर्तितम् ।
प्रवक्ष्ये केसराणां च चतुष्पत्रेषु वर्णकान् ।।३०।।

और अजीव होने से इसे भूत कहते हैं। तत्त्वादि, अर्थात् पृथिवी के क्रम से आकाश का पांचवाँ स्थान है और आकाश का बीज हकार ही है, इसलिये हकार को **पंचम** भी कहते हैं। सकार के आगे स्थिति होने से इसे **सान्त** तथा निवृत्ति कला से शान्त्यतीत कला पर्यन्त तत्त्वों के अर्थात् पृथ्वी से लेकर शिव पर्यन्त तत्त्वों के अन्त में स्थिति होने से **तत्त्वान्त** नाम दिया गया है। पृथिवी आदि भूतों के अन्त में व्योम की स्थिति रहने से व्योमबीज हकार को भी **भूतान्त** कहते हैं। शिव के प्रतिनिधि के रूप में इसका प्रभाव सर्वत्र व्याप्त होने से इसे **शिवार्ण** नाम दिया गया है। यह वाणी और मन के भी अगोचर है, अतः इसे **शून्य** कहते हैं। शिव-स्वरूप होने से इसका कभी क्षय नहीं होता, अतः हे महासेन ! इस हकार को **अव्यय** नाम दिया गया है। इस तरह से यहाँ ये सब शब्द हकार के पर्याय के रूप में स्मृत हैं। इस हकार- बीज की संस्थिति चक्र की कर्णिका में मानी गई है।।२२-३०।।

वर्णचक्र की केसर के चारों तरफ के चार पत्रों में स्थित वर्णों और उनके पर्यायों को अब मैं बता रहा हूँ। आधार, शक्ति, कार्य, पर और बिन्दु — ये पाँच बिन्दु के पर्याय-नाम शास्त्रों में स्मृत हैं। ळकार, आत्मबीज, देही, क्षेत्रज्ञ और भोगी — ये पाँच ळकार के पर्याय-नाम हैं। आधेय, शिव, करण, पर और नाद ये पाँच नाद के पर्यायवाची शब्द हैं। विद्या, बीज, क्षकार, कूट वर्ण और वर्गान्त — ये पाँच पर्याय क्षकार के परिगणित

चतुष्पत्रवर्णाः पर्यायाश्च

आधारशक्तिकार्याणि परं बिन्दुरनुक्रमात् ।
बिन्दोः पर्यायनामानि पञ्चैतानि स्मृतानि च ।।३१।।
ळकारमात्मबीजं च देहिक्षेत्रज्ञभोगिनः ।
एतानि पञ्चनामानि ळकारस्योदितानि च ।।३२।।
आधेयं च शिवं चैव करणं परनादकम् ।
नादपर्यायनामानि पञ्चैतानि स्मृतानि च ।।३३।।
विद्या बीजं क्षकारं च कूटवर्णं तथैव च ।
वर्गान्तं चैव पञ्चैते क्षकारस्य प्रकीर्तिताः ।।३४।।
बिन्द्वादिवेदबीजानि कर्णिकार्णा इति स्मृताः ।

सकारादिबीजानि

सकारः शक्तिबीजं स्यात् प्रथमः शुक्लधातुकः ।।३५।।
षकारो द्वितयं भानुरविमज्जादिवाकराः ।
शकारः श्री रमा लक्ष्मीरस्थि च त्रितयं विदुः ।।३६।।
वकारो वारुणोऽप्यापश्चतुर्थं मेद ईरितः ।
लकारः पञ्चमं चैन्द्रं मांसं च धरणी मही ।।३७।।
रकारश्चानलं रक्तं षष्ठं क्रोधश्च पावकः ।
यकारश्चानिलः स्नायुः सप्तमं मारुतस्तथा ।।३८।।

